International Journal of Sanskrit Research 2023; 9(6): 180-183

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(6): 180-183
© 2023 IJSR
www.anantaajournal.com
Received: 11-11-2023
Accepted: 14-12-2023

**ड. प्रदीप्तकुमारनन्दः**
सर्वदर्शनविभागमुख्यः,
श्रीजगन्नाथसंस्कृतविस्वविद्यालयः, पुरी, ओडिशा, भारत

**Corresponding Author:**
**ड. प्रदीप्तकुमारनन्दः**
सर्वदर्शनविभागमुख्यः,
श्रीजगन्नाथसंस्कृतविस्वविद्यालयः, पुरी, ओडिशा, भारत

# वैदिकेषु ईश्वरतत्त्वानुशीलनम्

**ड. प्रदीप्तकुमारनन्दः**

**सारांश**
भारतीयाः सततं तत्त्वज्ञानार्जने निरता इति सर्वे जानन्ति । ते शान्तचित्ताः जितेन्द्रियाः दिव्यचक्षुषोऽखिलं पदार्थज्ञानं करतलामलकवत् प्रत्यक्षीकुर्वाणाः विचारविवेकशीलाश्च भूत्वा मानवसमुदायस्य श्रेयसे कल्याणकामनया च यानि तत्त्वानि, यांश्च सिद्धान्तान् बुद्धियुक्तसहितान् ज्ञानप्राप्तिसाधनभूतान् आविर्भावयामासुः, तानि दर्शनशब्देन व्यवह्रियन्ते । तेषां तपस्यासम्भूतायाः धिषणायाः निखिलानां जागतिकानां पदार्थानां मूलतः आलोचनापूर्वकः तत्त्वज्ञानप्राप्तये युक्तिपूर्वकश्च यः प्रयत्नः साधितः स एव दर्शनशब्दवाच्यो भवति । वैदिकदर्शनसम्बन्धीयमीश्वरतत्त्वं संप्रतिमुपस्थापयिष्यते ।

**कूटशब्दः** दर्शनम्, ईश्वरः, वेदः, मन्त्रः

**प्रस्तावना**

**हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।**
**तत्त्वं पूषन् अपावृणु सत्यधर्माय दृष्टये ॥** [1] **इति ।**

अस्मिन् मन्त्रे दृष्टिशब्दो दर्शनपरको बोध्यः । हिरण्मयेन पिधानभूतेन पात्रेण एव सत्यस्य नाम आत्मनो द्वारं पिहितमस्ति । सुतरां पुषन् सत्यस्य ब्रह्मणः परमात्मनो वा तत्त्वस्य दृष्टये साक्षात्काराय वा अवरुद्धद्वारम् अपसारय इति मन्त्रार्थः स्पष्टः । अपि च स्मृतौ-

**असत्यमप्रतिष्ठ ते जगदाहुरनीश्वरम् ।**
**अपरस्परसम्भूतं किमन्यत् कामहैतुकम् ॥**
**एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।**
**प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥** [2] **इति ।**

---

[1] ईशावास्योपनिषत्सु १५ मन्त्रः

[2] भगवद्गीता- १६/८-९

"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"[3] "आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेन इदं सर्वं विज्ञातं भवति"[4] अन्यानि बहूनि श्रुतिवाक्यानि दर्शनस्य मूलाधारत्वेन निरूपितानि सन्ति। यदुक्तम्-

**श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।**
**मत्वा च सततं ध्येय एते दर्शनहेतवः॥**[5]

एतानि श्रवण-मनन-निदिध्यासनानि त्रीणि साधनानि सर्वदर्शनोपकारकाणीति निर्विवादमेव । दर्शनविहीनानां कृते दुःखध्वंस असम्भव उक्तः। सर्वमेव भगवता मनुना-

**वेदाभ्यासस्तपो ज्ञानमिन्द्रियाणां च संयमः।**
**अहिंसा गुरुसेवा च निःश्रेयसकरं परम्॥**
**सर्वेषामपि चैतेषाम् आत्मज्ञानं परं स्मृतम्।**
**तद्धि अग्रयं सर्वविद्यानां प्राप्यते ह्यमृतं ततः॥**
**सम्यग्दर्शनसंपन्नः कर्मभिर्न निबध्यते।**
**दर्शनेषु विहीनस्तु संसारं प्रतिपद्यते॥[6] इति।**

**भगवता याज्ञवल्केनापि-**

**इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम्।**
**अयं तु परमो धर्मो तद्योगेनात्मदर्शनम्॥**[7]

इत्यत्र दर्शनशब्दः आत्मसाक्षात्कारार्थं प्रयुक्तः। सरहस्यस्य निगूढतमस्य प्रपञ्चस्य तत्त्वमार्गप्रदर्शकं ज्ञानविशेषं विशेषप्राप्तिप्रयोजकं दर्शनमेव शास्त्रशब्देन व्यवह्रियते । शास्ति च[8] त्रायते च[9] शंसति च[10] इत्यादिभिः शास्त्रात्म-कत्वाद्दर्शनशब्दः सिद्धः। अपि च –

यच्छासि च क्लेशरिपूनशेषान् सन्त्रायते दुर्गतितो भवाच्च।

**तच्छासनात् त्राणगुणाच्च शास्त्रम्**[11]
**प्रवृतिर्वा निवृत्तिर्वा नित्येन कृतकेन वा।**
**पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते॥[12] अपि च-**
**शासनात् शंसनात् शास्त्रं शास्त्रमित्यभिधीयते।**
**शासनं द्विविधं प्रोक्तं शास्त्रलक्षणवेदिभिः॥**
**शंसनं भूतवस्त्वेकविषयं न क्रियापरम्॥**[13]

इति शंसनार्थकं ज्ञानप्रधानं दर्शनं तु वस्तुस्वरूप-प्रतिपादनपरं वस्तुतन्त्रं भवति । एवं च दर्शनं नाम वस्तुतत्त्वनिरूपकोऽव्यर्हितपुरुषप्रणेतृकः शब्दसन्दर्भविशेषः अथवा तत्त्वज्ञानसाधनं दर्शनशास्त्रमिति प्रतिभाति।

### वेदे ईश्वरस्वरूपम्

यदि वा ऋग्वेदे परमतत्त्वार्थः ईश्वरशब्द अनुपलब्धः, किन्तु तत्र ईश्वरार्थे ईशानशब्दस्य[14] बहुलतया प्रयोगो दृश्यते । एतदतिरिक्ता इन्द्र-अग्नि-वरुण-सूर्य्य-उषा-मरुत-चन्द्रमादि देवानां नामानि दरीदृश्यन्ते। अत्र बहुदेववादः स्वीकृतः । कालान्तरे "तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमा । तदेव शुक्रस्तद्ब्रह्म ता आपः स प्रजापतिः"[15] पुनः एकेश्वरवादः प्रतिष्ठितः" भुवः सम्राद इन्द्रः तत्य योनिः" अनेन मन्त्रेण इन्द्र एव देवेषु श्रेष्ठ उक्तः। यजुर्वेदे पुरुषसूक्ते "पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम् । उतामृतत्वस्येशानः यदन्नेना तिरोहति"[16] इत्यत्र पुरुषशब्देन ईश्वरो ज्ञेयः। सामवेदे ईश्वराद्भिन्नो नास्ति, ईश्वरतुल्यो न कोऽप्यस्ति, न भवति,नापि भविष्यति। तस्मात् "न त्वां वा अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते"[17] इति। अथर्वेऽपि "प्राणाय नमो यस्य सर्वमिदं वशे यो भूतः सर्वस्येश्वरो यस्मिन्सर्वं प्रतिष्ठितम्"[18] "कालो ह सर्वस्येश्वरो यः पितासीत् प्रजापतेः"[19] "अयमस्मि जरितः पश्य मा इह विश्वा जातान्यभ्यस्मि मह्य। ऋतस्य मा प्रदिशो वर्धयन्तयादर्दिशे

[3] बृहदारण्यकोपनिषत्सु- २/४/५
[4] तत्र-२/४/५
[5] विवरणप्रमेयसंग्रहे पृ- २
[6] मनुस्मृतौ अ० १२/८३-८५
[7] याज्ञवल्क्यस्मृतौ आचाराध्याये ८
[8] शासु अनुशिष्टौ १०७५ पाणिनीये धातुपाठे
[9] त्रैङ पालने ९६५
[10] शंसु स्तुतौ ७२८ धातुः
[11] माध्यमिककारिकायां ३ पृ
[12] श्लोकवार्त्तिक पृ३५०
[13] पराशरोपपुराणे अष्टादशाध्याये
[14] ऋग्वेदः १/११३/७
[15] यजुर्वेदे ३२/१
[16] तत्र १०/९०/२
[17] सामवेदे १/४/११
[18] अथर्व ११/६/९
[19] तत्र १९/५३/८

भुवना दर्दरीमि"[20] एतेषु सर्वेषु वेदमन्त्रेषु ईश्वरतत्त्वं निहितं सुदृश्यञ्च।
अस्मिन् संसारे ये ये पदार्था प्रादुर्भूताः प्रादुर्भवन्ति प्रादुर्भविष्यन्ति च तेषां सर्वेषां योगसूत्राणि कस्याः अपि महत्याः शक्तेः अधिनानि इति। सा शक्तिः सर्वातिशायिनी बृहती बलवती चास्तीति मन्त्रार्थः। एकेश्वरवादविषयेऽपि वेदो न मौनः।
"इदं मित्रं वरुणाग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्। एकं सद्विप्रा बहुधा वदन्ति अत्यग्निं यमं मातरिश्वान्माहुः"[21] "सुपर्णं विप्राः कवयो वचोभिरेकं सन्तं बहुधा कल्पयन्ति"[22] "तदेवाग्निस्तदादित्यस्तद्वायुस्तदुचन्द्रमा। तदेव शुक्रं तद् ब्रह्म ता आपः स प्रजापतिः" [23] अपि च-

**"न द्वितीयो न तृतीयश्चतुर्थो नाप्युच्यते।**
**न पञ्चमो न षष्ठः सप्तमो नाप्युच्यते**
**नाष्टमो न नवमो दशमो नाप्युच्यते।**
**स सर्वस्मै विपश्यति यच्च प्राणति यच्च न।**
**तमिदं निगतं स एष एक एकवृदेक एव।"**

इत्यादिषु वेदमन्त्रेषु एकेश्वरवादस्य विशेषवर्णनं समुपलभ्यते। मन्त्रार्थः- रे मानव ! एकमात्रं तं स्तुहि, यो जीवं सर्वप्रकारेण संरक्षति सर्वं च जानाति स सुखवर्षकः चेकितानः, कर्मविभाजकः जगत्पालकश्चास्ति। तथाहि श्रुतिः- "य एक इत् तमुष्टुहि कृष्टीनां विचर्षणिः। पतिर्यज्ञे वृषक्रतुः"[24] इति। बुद्धिमन्तो ज्ञानवन्तश्च जनाः इममेकं सत्यस्वरूपमीश्वरं एकस्मिन्नेव रूपे अनेकैः नामभिः आह्वयन्ति। तमेव ते अग्नि-यम-मातरिश्वा-इन्द्र-वरुण-मित्र-सुपर्ण-गरुत्मानादिनामभिः स्मरन्ति। वेदमते यः सर्वेषां कृते अर्चनीयः तमेभिः गीर्भिः स्तुहि। स हि सुखदाता सर्वशक्तिमान् सत्यस्वरूपवान् बुद्धिमान् सर्ववेत्ता सर्वशक्तिसंपन्नः सर्वविजयी विश्वस्य च स्वामी ईश्वरो भवति।[25] स अस्माकं पिता पालकः जनको बन्धुश्च। सर्वस्थानस्य सर्व ज्ञाता स एव। सर्वदेवानां नामानि विधारयति। सर्वे घटपटादिपदार्थाः तस्मिन्नेव निलीयन्ते।[26] कीर्त्तिश्च यशश्चाम्भश्च नभश्च ब्राह्मणवर्चसं चान्नं चान्नद्यं च। य एतं देवमेकवृतं वेद।[27] अत्र ईश्वरः सर्वसामर्थ्यवान् अद्भुतश्चास्ति। य ईश्वरं सर्वव्यापकं मनुते तस्मै सर्वपदार्थाः प्राप्नुवन्ति। यथा - यशांसि, पराक्रमता, स्थानानि, ज्ञानोद्भवतेजांसि, अन्नादीनि च।

## निष्कर्ष

वैदिकेषु मन्त्रेषु नैके दर्शनबोधकाः शब्दा उपलभ्यन्ते। तेषां विश्लेषणेन हि अस्माभिः दर्शनतत्त्वानि प्राप्तानि। एतदतिरिक्तेषु ब्राह्मणग्रन्थेषु ईश्वरतत्त्वमपि "यज्ञो वै प्रजापतिः"[28] यज्ञो हि सर्वशक्तिसंपन्न प्रजानां पिता इति सर्वेषां वैदिकानां मान्यता आसीत्। यज्ञस्य तादात्म्यं प्रजापतिना सह बहुलतया संबध्यते। शतपथे "त्रयत्रिंशद्देवताः प्रजापतिश्चतुर्त्रिंशो देवतानाम्"[29] ऐतरीये "त्रयत्रिंशद्वै देवा अष्टौ वसवः एकादशरुद्राः द्वादशादित्याः प्रजापतिश्च वषट्कारश्च"[30] अर्थात् प्रजापतिः चतुर्त्रिंशदेवता यज्ञभागग्रहीतारः परमेश्वर इति वर्णयन्ति।

## आरण्यकेषु तद्वत्

"प्रजापते रेतो देवा देवानां रेतो वर्ष-----"[31] इत्यत्र ऐतरीयारण्यके प्रजापतिः कुत्रापि परमतत्त्वत्वेन निरूपितः। प्रजापतेः सृष्ट्युत्पत्तिस्तत्र कल्पितः। स च प्रजानां मूलकारणं स्वयम्भु इत्युच्यते[32] तत्र नवमप्रपाठके ब्रह्मविदाप्नोति परम्। सत्यं ज्ञानमनन्तं ब्रह्म[33] इत्यादिषु ईश्वरस्वरूपं विविच्यते।

## उपनिषत्सु ईश्वरस्वरूपम्

ईशावास्ये "ईशावास्यमिदं सर्वम्"[34] इत्यत्र ईशा ईष्ट इति ईट्, तेन सर्वनियामकेन परमेश्वरेण सर्वत्र वास्यम् व्याप्यमिति। तैतरीये "सत्यं ज्ञानमनन्तं ब्रह्म"[35] मुण्डके "एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम्"[36] श्वेताश्वेते-

---

[20] ऋग्वेदः ८/१००/४

[21] ऋग्वेदः ७/१६४/४६

[22] तत्र १०/११४/५

[23] यजुः

[24] ऋग्वेद ६/४५/१६

[25] ऋग् ६/२२/१

[26] अथर्वः२/१/३

[27] अथर्वः १३/४

[28] शतपथब्राह्मणे १४/६/९/३

[29] तैत्तरीयब्राह्मणे १/८/७/१

[30] ऐतरीये १/१०

[31] ऐतरीयारण्यके २/१/३

[32] तत्र -तस्मात् इदं सर्वं ब्रह्म स्वयम्भव इति

[33] तत्रैव ९/१

[34] ईशावास्योपनिषत् १

[35] २/१

[36] माण्डूक्य ६/६

**तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम् ।**
पतिं पतीनां परमं परस्तात् विदाम देवं भुवनेशमीड्यम् ॥[37] इत्यादिषु श्रुतिवाक्येषु ईश्वर कुत्रापि ब्रह्मशब्देन कुत्रापि च परमात्मशब्देनाभिधीयते । "एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम्"[38] इत्यत्र सर्वेश्वरः सर्वज्ञः । सर्वेषां जीवानां उत्पाद-व्यय-ध्रौव्याणां मूलकारणम् । यच्चोक्तं नृसिंहतापिन्याम्-
"अभिमन्ता जीवो नियन्तेश्वरः । सर्वाहंमानी हिरण्यगर्भत्रिरूपः ईश्वरवद् व्यक्तचैतन्यः सर्वगो ह्येष ईश्वरः क्रियाज्ञानात्मकः । सर्वं शक्तिमयं सर्वे जीवाः सर्वमयाः सर्वावस्थासु तथाप्यल्पाः"[39] अपि चात्र-
"तद्विष्णुरीशानो ब्रह्मान्यदपि सर्वं सर्वगतं सर्वमत एव । - न हीदं सर्वं कदाचित् । आत्मा हि स्वमहिमस्थो निरपेक्ष एक एव साक्षी स्वप्रकाशः"[40] इत्यादिषु उपनिषत्सु ब्रह्मणो द्वे एव रूपे सगुणनिर्गुणे मिलतः । द्वे एव तत्र परब्रह्म अपरब्रह्म रूपेणापि उक्ते । तत्र अपरब्रह्मशब्दः ब्रह्मनाम्ना निर्दिष्टः । निर्विशेषब्रह्म केनापि विशेषणेन लक्षणेन वा निर्देष्टुं न शक्यते। सविशेषब्रह्म तु क्वचिदेव परमेश्वरनाम्ना अभिधीयते । "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति इत्यारभ्य य आत्मनि तिष्ठन् आत्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्मान्तर्याम्यमृतः"[41] "एष सर्वभूतानान्तरात्मा दिव्यो देव एको नारायणः"[42] "मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्"[43] "प्रधानक्षेत्रपतिर्गणेशः"[44] एतेषु श्रुतिवाक्येषु च कार्यावस्थः कारणावस्थः स्थूलसूक्ष्मरूपेण परमपुरुषः ईश्वर एव सर्वेषां कर्तृत्वेन निरूपितः । इत्यलं विस्तरेण ।

**सहायक ग्रन्था**


1. श्वेताश्वेतोपनिषत्
2. सुबालोपनिषत्
3. नृसिंहपूर्वतापिनी उपनिषत्
4. बृहदारण्यकोपनिषत्
5. माण्डूक्योपनिषत्
6. ईशावास्योपनिषत्
7. ऋग्वेदः
8. यजुर्वेदः
9. सामवेदः
10. अथर्ववेदः
11. माधमिककारिका
12. मनुस्मृतिः
13. श्लोकवार्त्तिकम्
14. शतपथब्राह्मणम्
15. ऐतरेयारण्यकः
16. याज्ञ्यवल्क्यस्मृतिः
17. श्रीमद्भगवद्गीता
18. पाणिनीयधातुपाठः


---

[37] ६/७

[38] माण्डूक्ये ६

[39] नृसिंहपूर्वतापिन्याम् २/९/७

[40] तत्र २/९/१०

[41] बृहदारण्यकोपनिषदि ३/७/३

[42] सुबालोपनिषदि ७

[43] श्वेताश्वेत ४/९-१०

[44] तत्र १/१०